B.K. BIRLA CENTRE FOR EDUCATION
SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

# MID-APRIL EXAMINATION (2026-27)

## SANSKRIT (119) (SET-A)

Class : X
Date : 16.04.2026
Admission No.:

Duration : 1 Hrs
Max. Marks : **25**
Roll No.:

---

सामान्यनिर्देशाः

1. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
2. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
4. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

### खण्ड 'क' भागः

### अपठितावबोधनम् 10 अङ्काः

प्रश्न 01 गद्यांशान् ध्यानेन पठित्वा प्रश्नान् उत्तरत - (गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर दीजिए।

एकदा पंजाबराज्यस्य नृपः महाराजः रणजीतसिंहः आखेटाय सैनिकैः सह वनमगच्छत् । ते एकस्मिन् स्थाने वृक्षस्य अधः वार्ताम् कुर्वन्ति स्म तदैव एकं प्रस्तरं तस्य दक्षिणे नेत्रे अपतत् । तेन तस्य तन्नेत्रे अतीव पीड़ा उत्पन्ना अभवत् तस्माच्च नेत्रात् रक्तबिन्दवः अपि अपतन् । महाराजः पीडया तत्रैव उपाविशत् । तदा तस्य सैनिकाः एकां स्त्रीं गृहीत्वा तत्रानयन् । ते कथितवन्तः - "नृपेन्द्र ! इयमेव अपराधिनी महिला भवन्तं पीड़ितम् अकरोत् अतः एतस्यै दण्डयतु भवान् ।" नृपः ताम् अवदत् - "अहं तव अपराधी नासम्। त्वां प्रति किञ्चित् कथितमपि न । पुनः कथं त्वं माम् आहतं कृतवती?" रोदन्ती सावदत् - "महाराज ! गृहे मम बालाः बुभुक्षिताः सन्ति अतः अहं प्रस्तरखण्डैः एतस्य वृक्षस्य फलानि अत्रोटयम् । परं दुर्दैववशात् प्रस्तरं भवन्तं अपीडयत् । क्षमस्व माम्। अहम् अज्ञाने एव ईदृशं कृतवती। पुनः कदापि ईदृशम् अपराधं न भविष्यति ।" इदं श्रुत्वा दयालुः नृपः तां स्त्रीम् अमोचयत् ।

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) 1X2=2

(i) नृपस्य नाम किमासीत् ?
(ii) नृपस्य नेत्रात् के अपतन् ?
(iii) नृपः कीदृशः आसीत् ?

(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 2X2=4

(i) सैनिकाः किं कथितवन्तः?
(ii) ते कुत्र वार्ता कुर्वन्ति स्म ?
(iii) रोदन्ती स्त्री किम् अवदत् ?

(स) भाषिककार्यम्। (भाषा संबंधी कार्य। (केवलं प्रश्नत्रयम्) 1X3=3

(i) 'अतः एतस्मै दण्डयतु भवान् ।' अत्र कर्तृपदं किम् ?

(क) एतस्मै (ख) दण्डयतु
(ग) भवान् (घ) अतः

(ii) 'गृहे मम बालाः -----------।' अत्र 'मम' पदं कस्मै प्रयुक्तम् ?

(क) स्त्रियै (ख) नृपाय
(ग) सैनिकाय (घ) वृक्षाय

(iii) 'दयालुः नृपः' अत्र विशेषणपदं किम् ?

(क) नृपः (ख) दयालुः

(ग) नृप (घ) दया

(iv) अनुच्छेदे 'पाषाणम्' इति पदस्य कः पर्यायः आगतः ?

(क) वार्ताम् (ख) नृपम्

(ग) अपराधम् (घ) प्रस्तरम्

(द) अस्य गद्यांशस्य उचितं शीर्षकं लिखत । 1X1=1

प्रश्न 2. भवती प्रभा अस्ति। मातरं प्रति स्वस्वास्थ्यविषये लिखितम् इवं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्ण लिखतु - (10×½=5)

विद्यालयपरिसरः

(i) ---------

समादरणीयाः (ii) ---------

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। सम्प्रति मम (iii) --------- परीक्षा सञ्चरति। अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते। अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति। अतः पठनस्य कार्यं (iv) --------- एव भवति, परंतु अध्ययनकारणात् शयनस्य भोजनस्य च (v) --------- एव न प्राप्यते। अतः अद्यत्वे मम (vi) --------- सुष्ठु नास्ति। अहं (vii) --------- पीडिता अस्मि। परं काचिद् अपि (viii) --------- नैव करणीया। आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि। परीक्षायाः अनन्तरं (ix) --------- आगमिष्यामि। तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः। पित्रे (x) ---------

भवत्याः पुत्री

प्रभा

मञ्जूषा

वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्, समुचितम्, नमः, समयः, चिन्ता

प्रश्न 3. प्रदत्तं चित्रं दृष्ट्वा मंजूशापद सहायतया संस्कृतेन पञ्च वाक्यानि रचयत - (5×1=5)



मंजूषा

लम्बोदरः, दीपः, मोदकं, पुष्पाणि, परिवारः, गणेशोत्सवः, आरती, आसनं, पुष्पहारं, पुष्पगुच्छः, अस्ति, वर्तते, विद्यते, फलानि, हाराणि, सन्ति, शुण्डः, गज इव मुखः

अथवा

'पुस्तकालयः' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत। (5)

मञ्जूषा - पुस्तकानि, तूष्णीम्, अनेकानि, जनाः, समाचारपत्रम्, स्थातव्यम्, आगच्छन्ति, अनेके, अनेकेषाम्, विषयाणाम्, ग्रन्थाः, ज्ञानवर्धनम्, अध्ययनम्, महत्त्वपूर्णम्

प्रश्न 4. रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं प्रपूर्य पुनः लिखत - (5×1=5)

रमेश प्रसादः - अभिवादये महोदय!

प्रधानाचार्यः - नमोनमः, किमागमनप्रयोजनम् ?

रमेश प्रसादः - (1) -------------------------------------- ।

प्रधानाचार्यः - परं सत्रस्य मध्ये प्रवेशः कथं संभवो भविष्यति ?

रमेश प्रसादः - (2) -------------------------------------- ।

प्रधानाचार्यः - अस्तु. पश्यामि अहं किं कर्तुं शक्नोमि? भवान् किं करोति ? छात्रस्य माता वा किं करोति।

रमेश प्रसादः - (3) -------------------------------------- ।

प्रधानाचार्यः - सा शिक्षिता अस्ति न वा?

रमेश प्रसादः - (4) -------------------------------------- ।

प्रधानाचार्यः - इदं तु बहुशोभनम्। शिक्षिता माता

रमेश प्रसादः - (5) -------------------------------------- ।

मञ्जूषा

(क) अहं केन्द्रसर्वकारे वित्तविभागे सहायकाधिकारी अस्मि। मम पत्नी एका गृहिणी अस्ति। सा गृहस्य सर्वाणि कार्याणि सम्पादयति।

(ख) शिशोः आचारव्यवहारेण समं शैक्षिकप्रगतेः अपि अवधानं कर्तुं समर्था भवति।

(ग) अहं भवतां विद्यालये स्वपुत्रस्य प्रवेशार्थम् निवेदनं कर्तुम् आगतोऽस्मि ।

(घ) अहं स्थानान्तरितो भूत्वा अत्रागतोऽस्मि, अतएव सत्रस्य मध्ये प्रवेशार्थ प्रार्थये।

(ङ) आम् महोदय। सा स्नातकपरीक्षोत्तीर्णा अस्ति।

अथवा

मञ्जूषापदसाहाय्येन कथायाः रिक्तस्थानानी पूरयित्वा कथां पुनः लिखत - (10×½=5)

एकदा अहम् सपरिवारं हिमाचल प्रदेशस्य (i) ---------- अगच्छम्। तत्र मम प्रथमं विश्रामस्थलं शिमला नगरमासीत् । तस्य (ii) --------- शोभा अवर्णनीय आसीत्। अनुभूतं यत् (iii) ------- स्व सर्वां सुन्दरतां अत्रैव विस्तारितवती । उच्चैः नीचैः स्वलेषु (iv) --------- हाटकं द्दष्ट्या वयं सर्वे मन्त्रमुग्धाः अभवाम। तत्पश्चात् वयं चिन्तपूर्णी (v) ----------- गतवन्तः । तत्र मातुः (vi) -------- दर्शनार्थमनेके जनाः आगताः आसन्। श्रूयते यत् तत्र (vii) ----------- जनाः यत् इच्छन्ति तेषां (viii) ----------- अवश्यमेव पूर्णा भवति। अतः अहमपि तत्र विद्यासुखस्वास्थ्यान् प्राप्तुं (ix) ----------- अकरवम्। ततः कसौली ज्वालाजी इत्यादीनि (x) -------- गत्वा स्वगृहं प्रत्यागच्छम्।

मञ्जूषा

स्थानानि, यात्रायाम्, आकर्षकम्, गत्वा, प्रार्थनाम्, तीर्थम्, चिन्तपूर्ण्याः, प्रकृति-देवी, नगरस्य, मनोकामना

---------------------------------------------- समाप्तम् ----------------------------------------------